International Journal of Sanskrit Research 2020; 6(1): 133-136

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(1): 133-136
© 2020 IJSR
www.anantaajournal.com
Received: 14-11-2019
Accepted: 18-12-2019

**डा. मुल्लपूडि बि यस् श्रीनाथ नारायण**
उपन्यासकः श्री सत्यसायि विश्वविद्यालयः प्रशान्तिनिलयम् भारत।

**Corresponding Author:**
**डा. मुल्लपूडि बि यस् श्रीनाथ नारायणः**
उपन्यासकः श्री सत्यसायि विश्वविद्यालयः प्रशान्तिनिलयम् भारत।

# मायाशक्ति निरूपकं शाक्तेय-शैव निर्णायकं ब्रह्मर्षि ताडेपल्लि राघवनारायण शास्त्रिभिः कृतं "मत्स्वप्नः" ग्रन्थसमीक्षणम्

## डा. मुल्लपूडि बि यस् श्रीनाथ नारायण

### प्रस्तावना

इदंकविः श्री ताडेपल्लि राघवनारायण शास्त्रिवर्यः अद्यतनकाले ब्रह्मर्षित्वेन सम्भावनीयतपोमहिमानुभावः, निराडम्बरः, साक्षात्कृतदेवीस्वरूपः, प्राचीन सम्प्रदायसंरक्षणप्रवणः, सदा गुरुध्यान-शिवध्यान-पूरितहृदयः, कारणजन्मा, आन्ध्रदेशे, गुण्टूरुमण्डले चन्दोलु (चंदवोलु) ग्रामे निवसति स्म। षण्णवतितम (96) वर्षीयः अपि, अविश्रान्तं धर्मबोधनार्थं पुराणगाथा ग्रन्थिविश्लथनार्थं,भक्तानाम् आगन्तुकानाञ्च तत्तदार्तिनिवारणार्थं बद्धकङ्कणः अयम्। आन्ध्रसंस्कृतभाषाद्वये अनेकान् ग्रन्थान्विरचय्य शतसहस्राधिकां उपन्यासपरम्परां श्रोतॄणां हृदयक्षेत्रेषु विकीर्य कृतार्थीकृतार्थिजनमन्दारः प्रोत्साहितानेकयज्ञक्रियाकलापः, 'श्रीदेवी' संसेवितचरणः श्रीमातुर्मन्त्र तन्त्रयन्त्रक्रियापारीणः अवश्यं दर्शनीयरूपः, अवश्यं स्तवनीयचरित्रः प्रातस्स्मरणीयः तपोराशिर्विजयतेतराम्।

गुरुवर्यस्यास्य प्रौढकवितानुगुम्फनेषु अन्यतमोऽयं ग्रन्थः "मत्स्वप्नः"। ग्रन्थोऽयं 1984 क्रिस्ताब्दे प्रकाशितः। देवनागर्यां आन्ध्र्यां च मुद्रितः। आन्ध्र भाषायां भावोऽपि प्रकाशितः। अमूल्योऽयं ग्रन्थः।

एकस्मिन् दिने मया श्रीमाता श्री महाराज्ञी देवी शक्तिः देहली मध्यमध्यासीना स्वप्ने दृष्टा। सौमङ्गल्यश्रीनिधानाङ्गयष्टिं तामीक्षित्वा अभूवमस्मि स्मितास्यः। हेतुं पृष्टोऽहं तया "नैव किञ्चित्, स्वभाव्यादेव" इत्यवोचं विनीतः। इति कवि काव्यमिदमारभते।

पुनस्तया पृष्टः कवि-, "व्यासोऽत्राऽऽनीतव्य इति, तत्सामीप्ये एव अम्बा किञ्चित् प्रष्टव्येति, एतच्च स्ववचनं बालभावादिति सम्भाव्य सोढव्यमिति तां प्रार्थयन् कविः क्रमेण स्वसन्देहं प्रष्टुमारेभे।

"अस्मान्सूत्वा साध्वि देवं किमूढा
वोढ्वेशानं मातरस्मान्पसूता।।" (5) इति कवेः सन्देहः।

आर्षग्रन्थपाठकाः श्रोतारो वा मानवाः पौराणिककथाश्रवणादिभिरेवं सञ्जातसन्देहाः बहुशो भवन्तीति, किन्तु

"आर्षग्रन्थेषूत्तरं प्रश्नदेशे
सम्बद्धं स्यादित्यनूचानवादः।।"

इति, विज्ञः व्याख्याबलात्, प्रमाणबलाच्च तत्तत्सन्देहानां समाधानं तत्रैव लभेत। इत्याविष्कृतभावनोऽयं कविवर्यः पूर्वोक्तस्य सन्देहस्य स्वीयविज्ञताबलात् "समाधानमेवमेव खलु, उतैतत्---इति कथयन् ग्रन्थसमाप्तिं साधयति।
ब्रह्माण्डपुराणे ललितोपाख्याने भण्डासुरकथा सङ्ग्रहेणात्र प्रस्तुता। विषङ्ग, विशुक्र नामक भण्डासुरानुयायिनौ स्त्रीपुंसात्मकं जगत् दुर्बलं कृत्वा कल्लोलितवन्तौ।

"भ्राष्टे न्यस्तं बीजमेवाभवद्धि
भण्डाधीनं लोकजातं समन्तात्।" (14)

इति वाचा शोचमानं नारदमहर्षिं सान्त्वयित्वा लोकनाथो विष्णुः तन्निर्मूलकं कल्पमुपादिशत् तस्मै। तदनुसारं देवैः कश्चन यागः उपक्रान्तः। भण्डः तद्विघ्नकारी भवेदित्याशङ्क्य विष्णुरेव विष्णुमायाविनिर्मिते द्वे कन्यके तदाकर्षणार्थं प्रेषितवान्। समन्त्रिकः भण्डः तन्मायाबद्धः अस्वतन्त्रो भूत्वा "वाच्यस्माकं वर्तितव्यं युवाभ्याम् " इति तत्कन्यका वाक्य वागुराबद्धोऽभूत्। किञ्चित् शेषे देवयागे ज्ञातविषयो भण्डः तत्प्रदेशं गत्वा तदावरकं कांस्यवप्रं पुनः पुनः भञ्जन्नपि निर्मूलं भङ्क्तुमसमर्थः ध्वस्तोत्साहः, वीतधैर्यः पुनर्विष्णुमाययाऽकृष्टः गृहं गतः। यज्ञः समाप्तः। प्रभाभासमाना बाला (परोक्षब्रह्मविद्या) तेजोराशिभूता यज्ञकुण्डे आविरासीत्।

"विद्यामूले हे परोक्षाऽजविद्ये
माला ग्रन्थाऽभीष्ट निर्भीति हस्ते।
सर्वारुण्ये फुल्लकल्हारसंस्थे
मातः! पाहि प्राणिलोकं प्रपन्नम्।।" (47)

इति देवैः प्रार्थिता सा देवी " अयि देवाः। यद्यप्यहं –

'विष्णूद्दिष्टस्याध्वरस्यास्मि सिद्धिः
नालं साहं भण्डमोहं निहन्तुं
मन्माताऽऽस्तेऽत्राऽऽहरिष्याम्यहं ताम्।।' (49)

इति भण्डनिर्मूलयित्रीं स्वीयामम्बां प्रस्तौति। (अत्र भण्डमोहं इति पदेन मोहरूपं भण्डासुरं इति वदन् कविवर्यः भण्डकथायां अन्तर्गतं प्रधानविषयं किञ्चित् विवृतवान्, एतच्च अन्तरकाव्ये विस्पष्टं प्रतिपादयति)। अन्तर्यागं साधयिष्यामीत्युक्त्वा साधकान् देवान् गृहीत्वा भूताधिचक्रं भित्वा सा उज्जगाम व्योम्नि। ध्यानयोगेन अन्तर्गतं देवं ध्यात्वा तत्प्रादुर्भावानन्तरं

"एते देवाः कर्मकाण्डेऽग्निशुद्धाः
कुर्वीशैतान् चिच्छुचिं प्रापितव्यान्। " (54) (चित्+शुचिं)

अन्तर्यागं त्वं कुरुष्व – इति नुन्नः निर्विकारः स पुरुषः यज्ञदीक्षां धृत्वा सृचा चित्तवृत्या चित्ताज्यं ज्ञानाग्नौ जहाव। यतोऽयं सर्वान्तर्यामी, तत्कृतयागोऽपि सर्वान् सम्बद्धीकरोति। चित्या उपात्तं चित्तं ज्ञानाग्निः यत् स्वीचक्रे तदेव अमनस्क योग इत्युच्यते। तस्मिन् चिदग्नौ सम्भवन्ती काप्यरूपा अतिरूपा शक्तिर्दृष्टा। सर्वान् देवान् चिदग्नौ पातयन्ती सद्यश्चक्रे ज्ञानवीर्यक्रियाढ्यान् सा देवी। तरर्चिता, तत्प्रर्थनानुसारं स्वस्याः उद्वाहं अभिप्रेतवती।

एकीकृत्य स्वेदृशौ सोदपस्यत्
सद्योजातोऽजः पुराणस्स एकः।
इच्छाप्राप्तस्सोऽपि कामेश्वरोऽभूत्
उद्वाह्यैनं साऽऽप कामेश्वरीत्वम् ।।

श्रीपुरे कृतसन्निवासौ तौ कामेश्वरीकामेश्वरौ व्यराजताम्। प्राक् सर्वेशानाऽपि देवी विश्वाधिराज्ये देवैर्भूयोऽभिषिक्ता पञ्चब्रह्माजिह्ममञ्चाधिरूढा सा श्रीमता श्रीमत्सिंहासनेश्वरी अभूत्।
अयि मातः, अत्रैव मे सन्देहः। प्राक् सम्भूता( बहिर्यागकुण्डोद्भवा)(69) सा, बाला इति कथं उच्यते? पश्चाज्जाता त्वं कथं स्यास्तदम्बा? एवं कथिता व्यासकथा कथं वा विज्ञानां पौराणिकानां अन्वेति? यद्वा भवदनुग्रहेण अहमेव समाधानं वच्मि, अङ्गीकुरुष्व। बाला परोक्षब्रह्मविद्या, त्वं तु अपरोक्षब्रह्मविद्या। अपरोक्षत्वं च आधिक्यसम्पादकम्। अपि च

"मन्त्रस्ते कूटत्रयात्मा ततस्त
त्सार भ्राजत्र्यक्षरोऽस्या मनुश्च"।(72)

ते मन्त्रः पञ्चदशीति प्रसिद्धः। पञ्चदशाक्षरसंयुतः। कूटत्रयात्मकश्च। बालाया मन्त्रश्च अक्षरत्रयात्मकः। एकैककूटात् एकैकं बीजमाहूय सङ्कलितः। अथवा एकपाद्विभूत्यधिष्ठात्री बाला। त्रिपाद्विभूत्यधिष्ठात्री च त्वम्। एभिः कारणैः भवती श्रीमाता, बाला ते बाला च भवति खलु –

"ओंकारेणैवोत्तमाङ्गं विचाल्य
देह्याज्ञां त्वं प्रस्तुतोपक्रमाय"। (73)

इति तस्याः अङ्गीकारं स्वीकृत्य अनन्तरस्वप्नकथायां प्रवृत्तो भवति कविः।
जगज्जनकस्य कामेश्वरस्य राजाधिराजत्वं, देव्याः श्री महाराज्ञीत्वं, मन्त्रिण्यम्बायाः मन्त्रिणं
श्रीपूश्चक्रं च निरूप्य कविः –

“सुधासिन्धोर्मध्ये सुरविटपि वाटीपरिवृते --- इति श्री शङ्करभगवत्पादानां दिव्यां

वाचमनुसन्धत्तवान्।
शिवदौत्यं, तद्वैफल्यं, रूपद्वयात्मिका विष्णुमायाकृतं –
भो, महात्मन्, भण्ड चण्ड प्रचण्डा
प्रत्यक्ष ब्रह्मात्म विद्यानवद्या।
सन्नद्धा सीमन्त सीमान्तदेशे
स्वध्यासीना शासितुं त्वां दुरन्तम् । । (82)
इति निर्भर्त्सनं, देव्याः भण्डस्य च सैन्यानां सङ्घर्षणञ्च ...
अनन्तरश्लोकेषु उपनिबद्धम्।
मन्त्रिण्यम्बा गेयचक्राधिरूढा
कोलैश्चक्रैस्स्यन्दने दण्डनाथा।।....(89)
“.......... भण्डश्चित्रं विघ्नयन्त्रं ततान ”।। (91)
“---- ताभिर्विज्ञप्ता विभोरैक्षतास्यं
कामेशी सा तत्क्षणेऽभूद्रणेशः”।।(92)

इत्यादि श्लोकजातं ललितासहस्रनामपरिचितानां सर्वेषां सम्मोदकारकं नूनं भवेत्। भण्डानुजातं विषङ्गं मन्त्रिण्यम्बा श्यामलाऽवधीत्। तदनुजातं विशुक्रं दण्डनाथा वराही अहनत्। भण्डकल्पितानसुरान्, भूतान् भव्यान्, संहर्तुं नारायणस्यावतारान् हस्तद्वन्द्वाङ्गुलीनां नखेभ्यः सा देवी ललिता व्यसृजत्। अन्ते

सर्वात्मीयानां प्रणाशं समीक्ष्य
देवीमेवाभ्यद्रवत् शून्यकेन ।
साप्येनं कामेश्वरेणाभिजघ्ने
भण्डं शून्यासुं सशून्यं ददाह।। (102)
इति पौराणिकी गाथा भण्डुसुरवधेन समाप्ता।
एतत्कथा प्रवचनानन्तरं कविः, व्यासभट्टारकं देवीञ्च, एवं प्रष्टुमारेभे।
नामं नामं त्वाञ्च तञ्च ब्रवीमि
स्थातव्यं वामाभिमुख्येन मेऽम्ब।
उद्वाहे ते, लोकमातृत्वकार्ये( कीर्तौ)
पौर्वापर्यं तद्विमृष्टव्यमत्र।। (106)
लोकस्य स्रष्टा ईश एव तात इति, तत्पत्नीत्वात् गौरी प्रजानामम्बा भवेदिति सर्वज्ञः कविकुलगुरुः कालिदासः गौर्याः लोकमातृत्वमूचे। (107)
शक्त्या युक्तः शक्तये तत् क्रियासु
नोचेदीशः स्पन्दितुं चाप्यशक्तः। (108)
इति शङ्करभगवत्पादाः स्वाभिप्रायमाविश्चक्रुः। को वा अभिप्रायः अदरणीयः – इत्यत्र सन्देहः ।
शाक्तेयाः -
अजामेकां लोहितशुक्लकृष्णां
बह्वीं प्राजां जनयन्तीं सुरूपाम् – इत्यादि श्रुतिवचनैस्त्वां निरूपयन्ति। (115)।
प्रौढकवयित्री गङ्गादेवी तु –

“दृष्ट्वा स्रष्टा मूलभूतौ शिवौ द्वौ
अभ्यस्यन् स्त्रीपुंससर्गं वितेने - ” इति स्वाभिप्रायं प्रकटितवती। (116)
अन्यः प्रश्नः –
एतत्सृत्यां प्रश्न उत्पादितोऽन्यः
स्वीयोद्वाहे पार्वती चेश्वरश्च।
विघ्नेशानं पूजयामासतुर्हीं-
त्युत्पत्तेः प्राग्युज्यतेऽर्चा कथं वा।। (117)
तथैव श्रीहर्षः सरस्वतीं विष्णुपत्नीम् अब्रवीत्। आगमेषु सा शम्भोः पत्नी इत्यप्यस्ति। (118)- एवं पुराणकथासु अक्षरे चाक्षरे अज्ञानां प्रश्नपरम्परा उदेति।
आद्ये प्रश्ने सोत्तरे सोत्तरास्स्युः
सर्वेऽतस्तं प्रस्तुतं प्रार्थयामः। (119)
इति ब्रह्मर्षिः अयं कविवर्यः समाधानसमन्वयं कर्तुमारेभे।
वर्तेधां मामाभिमुख्येन देवि,
त्वं चायं मौनी स नारायणांशः
युष्मद्वात्सल्यान्मयात्रोच्यमानां
श्रुत्वा ब्रूतं साधु वाऽसाधु वेति।।(121)
इति प्रथमं स्वविनयं प्रकटय्य एवं समाधत्ते।

सजातीय विजातीय स्वगतभेदरहितः निष्क्रियः निर्विकारः एकमेव ब्रह्म। तस्मिन्नेव ब्रह्मणि अग्नौ उष्णत्वमिव, बीजे अङ्कुरप्रादुर्भावशक्तिरिव निगूढा माया वर्तते। त्रिगुण साम्यावस्थायां शुद्धायां तस्यां मायायां यदा ब्रह्म प्रतिबिम्बितं तत्प्रतिबिम्बः ईश्वरोऽभूत्। सः सत्वप्रधानया मायया संयुक्तः बहुधा परिवर्तितव्यः इति मेने। (122)। भगवान् आदिशङ्करः इमामेव मायां प्राह।–

मायां चेमां शङ्करः प्राह विद्वान्
सच्चाऽसच्चाऽभूदितं सर्वमस्याः।
सत्सान्निध्ये भासतेऽसत्तथैव
लोके सर्वेषां स एष स्स्वभावः।।(123)
रूपरहिता शुद्धा माया परब्रह्मपत्नी इति च भगवत्पादानां अभिप्रायः। सा कामेश्वरी स च कामेश्वरः इति इच्छार्थककाम शब्दपूर्वकं तौ व्यवहृतौ। (126)
मायेशौ भूत्वा प्रपञ्चं प्रसूतौ
कामेशौ भूत्वा विवोढुं प्रवृत्तौ।
रुद्रो भूत्वा प्राक्स दाक्षायणीं त्वां
पश्चात्तां त्वां पार्वतीं चोपयेमे।। (127)

इति श्लोकेन माया, शुद्धमाया प्रतिबिम्बितः ईशश्च प्रथमं सृष्टिकारकौ, तावेव कामेश्वरी कामेश्वरत्वेन पुनः दम्पती सञ्जातौ। --- इत्यादि समन्वयेन पूर्वसन्देहानां समाधानं सम्भाव्यम्। ईश संयुक्तायां देव्यां रजोगुणप्रधानायां सत्यां स्वयमाविर्भूतः विरिञ्चिः सृष्टिकर्ता अभूत्। ईशस्य शक्ति भागयैव विराट्स्वरूपः विष्णुः अभूत्।(129)।

सृट्यामस्यां पुमांसः सर्वे ईश्वरस्वरूपाः। स्त्रियश्च सर्वाः शक्तिस्वरूपा इति उपनिषद् (उमामहेश्वरोपनिषत्) वचनानि, सूक्ष्म स्थूलसृष्टिमभिप्रेत्य सार्थकान्येव।
हे मातः। वैदिकवचनपर्यालोचनया सूक्ष्मसृष्टिवेलायां वैवाहिकाडम्बररहितं ईश्वरमुपगम्य तमेव भण्डासुर निर्मथनवेलायां पुनः प्रादुर्भूतं तं, त्वं पाणिग्रहणं कृतवती।

शृण्वेतन्मेऽत्रोच्यमानं समाधिं
विष्ण्वीशादि स्थूलसर्गो यदाऽभूत्।
सर्वे देवास्सर्वलोकास्समस्तं
भूतप्रायं भूतमेवेति मन्ये ।। (148)

तस्मात् गौरीविवाहे गणेशस्य पूजनाविधिं न वैरुध्यमाप्नोति। (140)
एतावदुक्त्वा कविः योगमार्गं विवृणोति।

ब्रह्माण्डं पिण्डाण्डकेऽत्रास्ति गूढं
षट्सप्ताऽष्टौ वाऽत्र चक्राणि सन्ति।
आदिक्षान्तास्तद्दलस्थाहि देव्यः (अकारादि क्षकारान्ताः)
मध्ये सूक्ष्मा कुण्डलिन्याख्य शक्तिः।।(142)

इत्यारभ्य सुषुम्ना, इडा, पिङ्गला नाडीषु वायुप्रसारः, इडापिङ्गलाभ्यां योगिकृतवायूत्थापनात्, प्रथमतः ऊर्ध्वं वालं अधश्शीर्षं – इति स्थिता कुण्डलिनी शक्तिः इदानीं अग्निरूपमाप्तस्य वायोः प्रसारात्-

"ऊर्ध्वं शीर्षं वालमूलं तथाऽधः
कृत्वोत्तिष्ठत्युज्ज्वलात्मा सुषुम्ना।
वायुर्वह्नीभूय साकं तयोद्यन्
मूर्धानं सन्नादभीमं प्रयाति।। (144)
तन्मार्गे चक्राणि पश्येत्क्रमेण
योगी भाग्याद्राजमार्गे निशायां
गच्छन् दीपेनाट्टकुड्ये पतन्तीं
छायां तत्रत्य द्रुमादेर्यथाऽच्छे।।" (145)

इत्यादि श्लोकैः चक्राणां, तदधिदेवतानां वशिन्यादि शक्तिरूपाणां, तत्तद्वर्णानां च, विवरणं समासञ्जितवान् ब्रह्मर्षिरयं कविः।

षट्चक्र विवरणानन्तरं –
मूर्धन्यास्तेऽयं सहस्रारसंज्ञ-
श्चक्रश्रेष्ठो मोक्षशक्त्या गुरुश्च। (152)

इति योगिनामावासं आनन्ददायकं सहस्रारं निरूप्य अष्टममेवं निर्वक्ति –

दृश्याऽदृश्यं चाष्टमं चक्रमूर्ध्वे
मूर्ध्नः पीठे स्वाङ्गुलीनां चतुष्के।
द्रष्टुं दूराद्योगिनामप्यशक्यं
शक्तिः शक्तो वा परं ब्रह्ममूलम्।। (153)

योगिनां दृष्टिभेदात् तद्ब्रह्मणः, अथवा शक्त्याः स्वानुभवविवरणानुसारं शाक्तेय-शैव-वैष्णवादि मतान्याविर्भूतानि।
एवञ्च प्रथमे मूलाधारे, अधिष्ठाता गणपतिः अष्टमे स्थितौ कामेश्वरीकामेश्वरौ च। एतद्रहस्यानुसन्धाने ईशयोर्विवाहे कथं गणपतिपूजा इत्याशङ्का अपास्ता भविति।
एवं वाग्रूपा वायुः परा, पश्यन्ती, मध्यमा वैखरी च भूत्वा तत्तच्चक्रसञ्चारिणी यदा भवति तदा विष्णुपत्नी, ब्रह्मपत्नी, शम्भुपत्नी, परब्रह्ममहिषी च भवति। "गिरामाहुर्देवीं "– इति भगवत्पादानां सौन्दर्यलहरीश्लोकः एतदंशप्रतिपादक एव।
एवञ्च प्रधानसन्देहस्य इदं तावत्समाधानं भवति –

अस्मन्माता पूर्वमूढ्वा चितं सा
ह्यस्मान्सूता निर्विवादोऽयमर्थः।
पूर्वं द्रष्टृणामभावादवित्तः
तत्सद्भावादद्य वेद्यो विवाहः।। (161)

इति जगन्मातुः कल्याणविशेषं जगतो मातृत्वं च समन्वयं कृतवानयं कविः।
एवमत्यद्भुतं योगमार्गं पौराणिकगाथासमन्वयं वेदान्त व्याख्या सम्भरितं शङ्करमतनिरूपकं इमं "मत्स्वप्न" नामकं ग्रन्थं, सहृदयाः, कविवराः, विलक्षण कविताऽध्वनीनाः, योगिनः, आरूढाः, आरुरुक्षवश्च सम्पूर्णं पठित्वा सानन्दाः मुक्तिमार्गसंस्कारकाश्च भवन्तु – इति सविनयं प्रार्थयामि। स्थालीपुलाकन्यायेन मया कृतमिदं ग्रन्थ विवरणपत्रं नाऽस्य समग्रसौन्दर्य-गाम्भीर्य-प्रदर्शकं – इति मा विस्मरन्तु तत्र भवन्तः। गुरुवर्याणां सर्वज्ञत्वं मम च अल्पज्ञत्वं प्रसमीक्ष्य इत्थं सविनयमावेदयामि।
यद्यनेन प्ररोचनपत्रेण सहृदयाः गुरुवर्यस्य काव्यविशेषाणां जिज्ञासवः भवेयुः धन्योऽहं स्याम्।

## संदर्भ


1. मत्स्वप्नः
2. ग्रन्थकर्ता - ब्रह्मश्री ताडेपल्लि राघवनारायणशास्त्रि प्रकाशकः – श्रीराम कथामृतग्रन्थमाला, चन्दोलु.
3. प्रथम मुद्रमणम् – रक्ताक्षिनाम संवस्तरं, मार्गशीर्षमासः
4. द्वितीयमुद्रणम् – वृषवत्सर भद्रपदमासः. प्रकाशकः - मुद्रण- श्रीलक्ष्मी प्रेस्, बापट्ल. आन्ध्रप्रदेश्